नं० ११४३-घ।

अनंतव्रत पूजाविधिः (धर्मशास्त्रम्)

पत्राणि २६ (सम्पूर्णम्) पत्र २६

नं० ११४३-घ

श्रीगणेशाय नमः

॥ अथानंतपूजाप्रारंभः शुभम् ॥

श्रीगणेशायनमः ॥ अथभाद्रपदशुक्लचतुर्दश्यामनंत
व्रतं ॥ तत्रमुहूर्त्तोदयव्यापिन्यां कार्य्यं ॥ मुहूर्त्तमस्तिचेद्भा
द्रेपौर्णमास्यांचतुर्दशी ॥ पौर्णमास्यासमायोगेव्र
तंचानंतकंचरेदितिस्कंदभविष्योक्तेः ॥ मु
हूर्त्तेतित्रिमुहूर्त्तोऽप्रशस्तपरं ॥ अतएवमाधवः ॥
उदयेत्रिमुहूर्त्तानुयायानंतव्रततिथिरिति ॥
यद्यपिमध्याह्नेभोज्यवेलायांसमुत्तीर्यसमुत्त
टे ॥ इतिमध्याह्नेभविष्ये ॥ अथव्रतविधिः ॥
आचम्यप्राणानायम्यदेशकालौसंकीर्त्यम

मसकलसौभाग्यादिमनोरथसिध्यर्थं अनं
तव्रतांगत्वेन आदौ श्रीयमुनादेवीप्रीत्यर्थंय
थासंभवद्रव्यैः यथाज्ञानेन यथामिलितोपचा
रैः श्रीसूक्तेन पुराणोक्तमंत्रेण षोडशोपचारैः
पूजां करिष्ये ।। गणपतिपूजनं कृत्वा आसना
दिकलशाराधनं कृत्वा ।। हिरण्यवर्णां शिर
सि तां म आवहनेत्रयोः अश्वपूर्णां कर्णयोः
कांसोस्मितां नाशिके चंद्रां प्रभासां मुखे आ

अ. ५. दि स्वर्ल्ग्यीवायां ॥ ॐ पेतुमां ॥ बाह्वो ॥ क्षुत्पिपासे

तिहृदये ॥ गंधद्वारेति नाभौ ॥ मनसः काममिति

लिंगे ॥ कर्दमेनेति गुह्ये ॥ आपस्रजंति स्नूवी: ॥

आर्द्रायः करिणीयमिति जंघयो: ॥ आर्द्रांपुष्करि

णीयमिति जान्वो: ॥ तांम आवहेत्ति पादयो: ॥ यः

शुचिः सर्वांगे ॥ कलशपूजनं ॥ लोकपावन सं

भूते इंद्रनीलसमप्रभे ॥ त्वेत्र सादादहं देवी

विष्णुरूपीन मोस्तुते ॥ ध्यानं ॥ सरस्वतीनम शिव

स्तुभ्यं सर्वकाम प्रदायिनी ॥ सर्वसौभाग्यमे देवी

व्रतसंपूर्णहेतवे॥ हिरण्यवर्णा॥ यमुनादेव्यैनमः
आवाहने॥ कलशस्यमुखेविष्णु-आयंतुयमु
नादेवीदुरितक्षयकारकाः॥ इमंमेगंगेत्याः
प्रवतो-एतैर्मंत्रैः उदकमापूर्य-आपोहिष्ठेतिति
सृभिरभिमंत्र्य॥ अष्टौलोकपालानावाह्य॥ इं
द्रंवो आग्निंदूतं-यमाय-मोषुण-तत्वायामि-त
ववाय-सोमाय-तमीशा-सिंहासनसमारूढे दि
व्याशक्तिसमन्विते॥ सर्वलक्षणसंपूर्णे यमुने
तेनमोस्तुते॥ तांमआवह-आसनं॥ गुरुपादे

अ. पू. नमस्तुभ्यं शंकरप्रियभामिनी ॥ सर्वकामप्रदे देवी भ
२ द्रायै ते नमोस्तु ते ॥ अर्घ्यपूर्णो • यमुनायै · पाद्यं ·
3 विष्णुपादोद्भवे देवी सर्वाभरणभूषिते ॥ कृष्णाम्बु
र्ले महादेवी कृष्णावेण्यै नमोस्तु ते ॥ कांसोस्मि
तां · आचमनं · ॥ सर्वपापहरे देवी विश्वस्य प्रियभा
मिनी ॥ सर्वसौभाग्यते देवी यमुने त्वं नमोस्तु ते ॥
चंद्रां प्रभासां · अर्घ्यं ॥ नंदपादोद्भवे देवी शंकरा शिवू
र्धशारीरणी ॥ सर्वलोकहिते देवी भीमरथ्ये नमो २
स्तु ते ॥ पंचामृतस्नानं ॥ सिंहपादोद्भवे देवी ना

रसिंहसमप्रभे॥सर्वलक्षणसंपूर्णे भवनाशेन
मोस्तुते॥शुद्धोदकस्नानं॥अभिषेकः॥विष्णु
पादाब्जसंभूते गंगे त्रिपथगामिनी॥सर्वपाप
हरे देवी भागीरथ्ये नमोस्तुते॥उपैतु मां॰वस्त्रं॥
त्र्यंबकस्य जटोद्भूते सर्वाभिष्टप्रदायिनी॥पाव
नं सर्वलोकस्य गोदावर्य्ये नमोस्तुते॥कंचुकीं॥
कांचनं राजतं वस्त्रं ब्रह्मणा निर्मितं पुरा॥अहं
ददामि देवेशी यमुने भक्तवत्सले॥क्षुत्पिपासा
म॰यज्ञोपवीतं॥माणिक्यमुक्तावलिहारकौस्तु

अ·पू· अंगोमेदवैडुर्यकपुष्परागैः ॥ देवांगनी-ठेश्च कृतां ग

४। मायामन्यां निरत्नाभरणानि देवी ॥ आभरणं हरि

५ द्रा ॥ कुंकुमं ॥ कज्जलं ॥ कात्यरात्रि नमस्तुभ्यं · नाउपनं ॥

कंठसूत्रादि सौभाग्यं · ॥ सौभाग्यद्रव्यं ॥ गंधं ॥ अक्ष

तां ॥ पुष्पं ॥ अंगपूजा ॥ चंचलायै नमः पादौ पूजयामि ॥

पंचपदायै · जंघे · देव्यै नमः जानुनी · कमलायै · ऊरू ·

भक्तवत्सलायै · कटिं · हंस्यै · नाभिं · मन्मथवासिन्यै ·

नमः हृदयं · भद्रायै · स्तनौ · शक्तिन्यै नमः बाहू · र शिवू ४

कंकंठ्यै · कंठं · भयहंत्र्यै · मुखं · गौर्यै · नेत्रौ · भागी

रथ्यैनमः ललाटं यमुनायैन शिरः सरस्वत्यै नमः
सर्वांगं पूजयामि ॥ अथ नाम पूजा ॥ यमुनायै सिता
यै नमः सकरविघालायै उत्पलायै अधिष्टप्रदायै
विधात्र्यै हरिरूपिण्यै सिंधुचूडामण्यै शिवायै शं
करार्ध्यै शरीरिण्यै ब्रह्मांडरूपिण्यै महारूपिण्यै अं
टालशांत्यै गरूडायै गंगायै यमुनायै नर्मदायै गा
यत्र्यै सावित्र्यै गिरिजायै चंद्रचूडामण्यै सर्वैश्वर्यै
महालक्ष्म्यै २४ दशांगगुग्गुलं धूपं कर्दमेन धूपं
आज्यं च वर्त्तिसं आपस्तजंतु दीपं अन्नं चतुर्विधं

अ·पू
५
5

आर्द्रांयः करिणीं · नैवेद्यं पानीयं पावनं श्रेष्ठं गंगादि सरिदुद्भवं ॥ हस्तप्रक्षालनं देवी गृहाणा सुखशोधने ॥
हस्तप्रक्षालनं · पूगिफलं · दूर्वं फलं · हिरण्यगर्भेति · ॥
दक्षिणां ॥ नीरांजनं ॥ केतकीजातिकुसुमै मल्लिकार
कुलान्विच ॥ पूजितासितमयादेवीविश्वप्रीत्यैनमो
स्तुते ॥ आर्द्रां पुष्करिणीं · पुष्पांजलिं · तांम आवह ·
प्रदक्षिणां · सुरासुरेंद्रादि किरीटमौक्तिकैर्युक्तं नदी
शेतव पादपंकजं ॥ परंपरा प्राप्तवरं सुमं उगलं न
माभिभक्त्या मम कामसिध्यै ॥ यः शुचिः प्रयतो ·

नमः स्कारः॥ भवानीते महालक्ष्मी सर्वकामप्रदा
यिनी॥ व्रतं संपूर्णतां यातु यमुने ते नमो स्तुते॥ इति
प्रार्थना॥ आवाहनं॰ यस्य स्मृत्या॰ इति यमुनापूजा॥
अथ शेषपूजा॥ देशकालौ स्मृत्वा॥ श्रीमदनंतव्रतां
गत्वेन शेषपूजां करिष्ये॥ मुष्टिपात्रेण दर्भेण फणाः
सप्त शुभावहाः॥ कृत्वा दर्भमयं देवं फणाः सप्तसम
न्वितं॥ फणासप्तान्वितं शेषं पिंगलाक्षं चतुर्भुजं॥
दक्षिणोर्ध्व करे वामे गदाभिश्च समन्वितं॥ अनंता
द्यादि संस्थानं कथितं व्रतवित्तम॥ ॐ श्रीशेषाय॰ ध्यानं॰

अ·पू· अजगरो नाम कं· आवाहनं सर्पः सर्पो कं कं· आश
नं· कालिको नाम· पाद्यं· यदि कालिक· अर्घ्यं· य
शस्करं· पंचामृतस्नानं॥ शुद्धोदकस्नानं· कर्को
टको· वस्त्रं· नमोअस्तुसर्पेभ्यो· उपवीतं· माभि
भे· गंधं· आदित्यरथवे कं· अक्षतां· गरुडस्य कं·
पुष्पं· अथांग पूजा॥ अनंतायनमः पादौ· वासुकये·
जानुनी· शंखाय· कटिं· पद्मा· नाभिं· कंबलाः· स्त
नौ· कर्कोटकाय· भुजौ· नागाय· कंठं· फणाय· मु शिव
खं· अजगराय· ललाटं· धृतराष्ट्राय· शिरः· शंख

फणाय· सर्वांगं· अथनामपूजा· कालिकाय· तक्ष
काय· पिंगलाय· नागाय· भुजंगाय· शेषाय· स
र्पाय· अहिरिवभोगैः० परिमलद्रव्यं· मासर्पसर्प
भद्रंते· धूपं· आस्तीकवचनं· दीपं· नैवेद्यं· मध्येपा
नीयं· उत्तरापोशनं· हस्तप्रक्षालनं· करोद्वर्त्तनं· पू
गीफलं· दक्षिणाफलं· नीराजनं· यशस्कर मंत्रपु
ष्पं· प्रदक्षिणां नमस्कारः॥ समाप्तं॥ अथानंतपू
जा॥ अद्येत्यादि· श्रीमदनंतप्रीत्यर्थं पुरुषसूक्ते
नमूलमंत्रेणपुराणोक्तमंत्रैश्चषोडशोपचारैः पूजां

अ·पू· करिष्ये ॥ पुरुषसूक्तेन मूलमंत्रेण न्यासं कृत्वा ॐ नमो भ
७ गवते वासुदेवायेति मूलमंत्रः ॥ कलशपूजनं शंखपूज
7 च नं कृत्वा ॥ प्राणप्रतिष्ठा· ततस्तु मूलमंत्रेण प्रणिपत्य
चतुर्भुजं ॥ नवाम्रपल्लवाभासं पिंगश्मश्रूचलोचनं ॥
पीतांबरधरं देवं शंखचक्रगदाधरं ॥ ध्यायेत्प्रसन्न
वदनं सर्वाभरणभूषितं ॥ त्रैलोक्यपूजितानंतं विश्व
रूपं विचिंतये ॥ ध्यानं ॥ ॐ· सहस्रशीर्षा· आगच्छा
नंतदेवेश तेजोराशिजगत्पते ॥ यावद्व्रतं समाप्येत ह्रिव्
तावत्त्वं सन्निधो भव ॥ ॐ नमो भगवते· श्रीमदनं ७

लाय सांगाय सह परिवाराय· आवाहनं· अनंतसूत्र
चतुर्दशग्रंथिषु चतुर्दशदेवताः आवाहयेत्॥ प्रथम
ग्रंथो मोहिनीसहितं अनघं आवाहयामि॥ द्वितीय
ग्रंथो॰ श्रीयासहितं वामनं· तृतीय· देवीसहितं शौ
रिणं आ· चतुर्थ· पद्मिनीसहितं वैकुंठं आ· पंचम·
महाबलासहितं पुरुषोत्तमं आ· षष्ठ· अजासहितं प
द्मनाभं आ· सप्तम· मंगलासहितं· हृषीकेशं आ· अ
ष्टम· वरदासहितं माधवं आ· नवम· सुभगासहितं·
मधुसूदनं आ· दशम· अपराजितासहितं अच्युतं· आ·

अ·पू·
८

एकादश्या। भगवतीसहितं अनंतं आ· द्वादश्या· जया
सहितं गोविंदं आ· त्रयोदश्या· विजयासहितं कृष्णं आ·
चतुर्दश्या ग्रथे सुभद्रासहितं अपराजितं आ· १४ मो
हिन्यै नमः मोहिनीं आ॰ १ श्रियै· श्रियं आ॰ २ देवीं॰
३ पद्मिनीं· ४ महाबलां॰ ५ अनां· ६ मंगलां॰ ७ वरदां· ८
सुभगां॰ ९ अपराजितां· १० भगवती· ११ जयां· १२ वि
जयां॰ १३ सुभद्रां॰ १४ इति सूत्रे ग्रंथि देवता आवाह्य
अथ पीठ पूजा· आग्नेयादि चतुः कोणेषु॥ गणपतिं· शिवं
दुर्गां· क्षेत्रपालं· वास्तोष्पतिं· कर्णिकायां· मंमं

रुद्राय॰ कां कालाग्निरुद्राय॰ कुं कूर्माय॰ आं आधार
शक्त्यै॰ प्रं प्रकृत्यै॰ शिं शिलारूप कमठाय॰ शें शेषाय॰
पृं पृथिव्यै॰ क्षीं क्षीरसिंधवे॰ नं नवरत्नमणिद्वीपाय॰
रं रत्नोज्वलित सहित महामंडपाय॰ नं नवरत्नमयपा
रिजातताय॰ रं रत्नवेदिकायै॰ इति संपूज्य॥ आग्नेय
कोणे धर्माय॰ नैरृते ज्ञानाय॰ वायव्ये वैराग्याय॰
ऐशान्ये ऐश्वर्याय॰ पूर्वे अधर्माय॰ दक्षिणे अज्ञाना
य॰ पश्चिमे अवैराग्याय॰ उत्तरे अनैश्वर्याय॰ कर्णिका
मध्ये सप्तवलयोपेताय सहस्त्रफणामंडितानंताय॰

अं॰पू॰ फणोपरि॰ आनंदकंदाय॰ संविन्नालाय॰ सर्वतत्वसरो
२ रुहाय॰ प्रकृतिपत्रेभ्यो॰ पंचाशद्वर्णकर्णिकायै॰ अर्क
मंडलाय॰ तापिन्यादिद्वादशकलाभ्यो॰ सोममंडलाय
अमृतादिषोडशकलाभ्यो॰ वन्हिमंडलाय धूम्रार्चि
रादिदशकलाभ्यो॰ सत्वाय प्रबोधात्मने॰ रजसे प्र
कृतात्मने तमसे तमात्मने आत्मने॰ अंतरात्मने॰
परात्मने॰ ज्ञानात्मने॰ मायातत्वाय॰ कालतत्वाय॰
विद्यातत्वाय॰ परतत्वाय॰ तद्बहिः पूर्वादिकेशरेषु शिव
विमलायै॰ उत्कर्षिण्यै॰ ज्ञानायै॰ क्रियायै॰ योगायै॰ २

प्रह्वायै॰ सरस्वत्यै॰ ईशान्यै॰ कर्णिकायां॰ अनुग्रहा
यै॰ ॐ नमो भगवते वासुदेवाय सर्वभूतात्मने विष्णवे स
र्वात्मसंयोगपीठात्मने श्रीमदनंताय॰ अष्टौ भैरवाना
वाह्य तद्यथा॥ असितांगभैरवाय॰ रुरुभैरवाय चंड
भैरवाय॰ क्रोधभैरवाय॰ उन्मत्तभैरवाय॰ कपालभै
रवाय॰ भीषणभैरवाय॰ संहारभैरवाय॰ विप्रवर्णं
श्वेतं सहस्रफणामंडलमंडितं शेषं पूर्वे आवाह
यामि॥ वैश्यवर्णं नीलं पंचाशत्फणामंडलमंडितं
तक्षकं आग्नेयां आ॰ विप्रवर्णं कुंकुमाभं सहस्रफणा

ॐ·पू· ऊं रूतं अनंतं दक्षिणे आ· क्षत्रियवर्णं पीतं सप्तशतफणामं
२० डलमंडितं वासुकिं नैरृते आ· क्षत्रियवर्णं पीतं सप्तश
तफणामंडलमंडितं शंखपालं पश्चिमे आ· वैश्यवर्णं
10 नीलं पंचाशत्फणामंडलमंडितं महापद्मं वायव्ये आ·
शूद्रवर्णं कृष्णं त्रिंशत्फणामंडलमंडितं कंबलं उ
त्तरे आ· शूद्रवर्णं श्वेतं त्रिंशत्फणामंडलमंडितं
कर्कोटकं ऐशाने आ· इति पीठपूजा॥ अथ मंडपपू
जा॥ पूर्वद्वारे॥ श्रियै· रत्नह्रीं पाय· धात्रे· विधात्रे· अ शिव
सितांगभैरवाय· महापद्माय· ऐरावताय· इंद्राय· २०

वज्राय॰आग्नेये॰रुरुभैरवाय॰पुंडरीकाय॰अग्नये॰
शक्तये॰पद्माय॰दक्षिणद्वारे॥चंडभैरवाय॰श्रि
ये॰चंडाय॰प्रचंडाय॰सुखिने॰शंखाय॰वामनाय॰
यमाय॰दंडाय॰नैर्ऋत्ये॰क्रोधभैरवाय॰मकराय॰
मुकुंदाय॰निर्ऋतये॰खड्गाय॰पश्चिमद्वारे॥उ
न्मत्तभैरवाय॰श्रियै॰गंगायै॰यमुनायै॰पद्मायै॰
कलपायै॰अंजनायै॰वरुणाय॰पाशाय॰वायव्येत्क
पालभैरवाय॰कुंदाय॰पुष्पदंताय॰आयवे॰अंकु
शाय॰उत्तरद्वारे॥भीषणभैरवाय॰श्रियै॰शिवायै॰

अ.पू. देहल्ये. शंखनिधे. सूर्यमंडलाधिपतये. महेश्वराय.
११ कुंदाय. सर्वाभौमः. सोमायै. गदायै. ईशान्ये. संहारभै
रवाय. नीलाय. स्ववीय. सुप्रतीकाय. ईशान्ये. शूला
य. तदसुमित्रा. महावैष्णवी. तिष्ठा. इतिपीठपूजा॥ पुरु
षएवेदं. अनंतगुणरत्नायविश्वरूपधरायच॥
नमोमहाहम्यदेवाय अनंतायनमो. नमः॥ आसनं.
एतावानस्य.॥ यथात्वंसर्वदेवानांत्रयसेभूभुवादि शिव
कं॥ तथापालयमांदेवत्वदंघ्रिशरणागतं॥ पाद्यं. त्रि ११
पादूर्ध्वं. अनंतानंतदेवेशअनंतफलदायकः॥ अनं

दोर रूपेण गृहाणार्घ्यं नमोस्तु ते ॥ अर्घ्यं ॰ तस्माद्विरा
ळजा ॰ सुरासुराणामीशाय क्षीराब्धिशायनाय च ॥
ददाम्याचमनं देवे अनंताय नमो नमः ॥ आचमनी
यं ॰ ॥ दधिक्षौद्रघृतं चैव गुडखंडविमिश्रितं ॥ तु
ष्टिदं सर्वदेवानां मधुपर्कं ददामि ते ॥ मधुपर्कं ॥ पं
चामृतेन स्नापयिष्ये ॥ आप्यायस्व स ॰ क्षीरोदतनया
नंत क्षीरोदत्तनयाप्रिया क्षीरोद गंधक्षलक्षीरं स्ना
नाय प्रतिगृह्यतां पयस्नानं ॰ दधिक्राव्णो ॰ जगदे
तद्धृधासि त्वं ददामि जगतां हितं ॥ ॰ दधिवामनरूपेण

अ. पू. १२

दधिस्नानं च गृह्यतां॥ दधिस्नानं॥ घृतं मिमिक्षे॰ घृ
तकुंभसमायुक्तं घृतयोने घृतप्रिया॥ घृतभुक् घृ
तनामासि घृतस्नानाय गृह्यतां॥ घृतस्नानं॥ म
धुवाता॰ मधुरूपो वसंतस्थं त्वमेव जलतां हि तं॥ मधुसू
दन संप्रीत्या मधुस्नानं च गृह्यतां॥ मधुस्नानं॥
स्वादुः पवस्व॰ शर्करागुडसंयुक्तं जगतस्त्वं ददा
सि यत्॥ अनंत शर्कराप्रीत्या गृह्यतां स्नानकर्म शिव १२
णो॥ शर्करास्नानं॥ हरिचंदनतो पार्थ हरप्रीति
करं शिवं॥ सुरभिप्रिय गोविंद गंधस्नानाय गृ

ष्यतां॥ गंधोदकं ॥ ततो वेदिकामंत्रैर्विष्णुसूक्तैः पुरु
षसूक्तैरभिषेकः कार्यः॥ यत्पुरुषेण॰ अनंतायनम
स्तुभ्यंसहस्रशिरसे नमः॥ नमोस्तु पद्मनाभाय विश्व
रूपायते नमः॥ स्नानं॥ तंयज्ञं॰ नारायणनमस्तेस्तु न
रकार्णवतारण॥ त्रैलोक्यपावकानंत त्राहि मां भव
सागरात्॥ वस्त्रं॥ अनंतदेवमुद्दिश्य पुराणपुरुषो
त्तमः॥ गृहाणाचमनं देव अनंतायनमो नमः॥ वस्त्रां
ते आचमनीयं॥ तस्माद्यज्ञात्सर्वहुतः सं॰ दामोदर
नमस्तेस्तु त्राहि मां भवसागरात्॥ ब्रह्मसूत्रं सोत्त

अ॰पू॰
१३
13

रीयं गृहाण सुरसत्तम॥ यज्ञोपवीतं॥ तस्माद्यज्ञात्स
र्वहुत ऋचः॰ श्रीखंडं चंदनं दिव्यं नानागंधसमन्वि
तं॥ कर्पूरादिसमायुक्तं प्रीत्यर्थं प्रतिगृह्यतां॥ चंद
नं॰॥ सुगंधीकुंकुमायुक्ता विमलास्तंडुलाः शुभाः॥
अनंतेशमया दत्ता अक्षताः प्रतिगृह्यतां॥ अक्षताः॥
लक्ष्मीपते जगन्नाथ भक्तानुग्रहकारक॥ नाना
रत्नांचिताकीर्णं भूषणं च ददाम्यहं॥ आभूषणं॥ त
स्मादश्वा॰॥ मंदारैः पारिजातैश्च केतकीपाटलैः शु शिवू
भैः॥ जातीचंपकपुष्पाणि ददामि प्रियवल्लभ॥ पुष्पं॥ १३

अहिरिवभोगैः॰कस्तूर्याद्याश्रयो गंधाभोगार्थं तेम
याहृतः॥नानापरिमलद्रव्यं गृहाण परमेश्वर॥प
रिमलद्रव्यं॥अथावरणपूजा॥पूर्वे।श्रियै॰धात्र्यै॰
विधात्र्यै॰द्वारवत्स्यै॰दक्षिणे॰शांत्यै॰पद्मिन्यै॰मे
धायै॰श्रियै॰पश्चिमे।श्रियै॰गंगायै॰यमुनायै॰सर
स्वत्यै॰उत्तरे।श्रियै॰दूर्व्यै॰ब्राह्म्यै॰माहेश्वर्यै॰ततः
पद्मपत्रेषुवायव्यकोणादारभ्य॰लक्ष्म्यै॰सरस्वत्यै॰
कीर्त्यै॰न॰प्रीत्यै॰पुष्ट्यै॰तुष्ट्यै॰गणपतये॰दुर्गायै॰द
याब्धे त्राहि संसारसर्पान्मां शरणागतं॥भक्त्यासम

अ॰पू॰ पंये त्वा हं प्रथमावरणार्चनं ॥ प्रथमावरणं ॥ रवये सो
२४ माय: भौमाय॰ बुधाय॰ बृहस्पते॰ शुक्राय॰ शनैश्चरा
य॰ वरुणाय॰ ब्रह्मणाय॰ गौर्यै॰ गणेशाय॰ सर्पेभ्यो॰
गुहाय॰ सूर्याय॰ शिवाय॰ दुर्गाय॰ अंतकाय॰ वि
श्वेभ्यो देवेभ्यो ॥ वितगावे॰ कामाय॰ महादेवाय॰
चंद्राय॰ दयाब्धे॰ रुद्राय॰ अग्नये॰ यमाय॰ निर्ऋ शिव
ते॰ वरुणाय॰ वायवे॰ सोमाय॰ ईशानाय॰ दयाब्धे॰ रू
सिधलक्ष्म्ये॰ विद्यालक्ष्म्ये॰ अमृतलक्ष्म्ये॰ योगल २४
क्ष्म्ये॰ भोगलक्ष्म्ये॰ दयाब्धे॰ ४ केशरकर्णिकाम

ध्ये॥ अं अनंताय · संकर्षणाय · परमात्मने · विश्वरू
पिणे · विश्वरूपिणे · विश्वरूपाय · पद्मनाभाय · श्री
कंठाय · अच्युताय · वाक्पतये · केशवाय · सर्वात्म
ने · शेषशायिने · शंखचक्रगदाधराय · श्रीम
दनंताय · दयाब्धे · ५ अं आत्मने · निं निवृत्त्यै · अं
अंतरात्मने · प्रं प्रतिष्ठायै · पं परात्मने · नं नंदजायै ·
विं विद्यायै · ज्ञां ज्ञानायै · शां शांत्यै · दयाब्धे · ६ वा
वासुदेवाय · श्रिं श्रियै · सं संकर्षणाय · प्रं प्रद्युम्नाय ·
श्रीं श्रीत्यै · अं अनिरुद्धायै · रं रत्यै · दयाब्धे · ७ अनं

अ·पू· नाय· सूक्ष्माय· शिष्टाय· रुद्राय· त्रिमूर्तये· श्रीकंठा
१५ य· दयाब्धे· अणिमायै· महिमायै· लघिमायै· गरि
15 मायै· प्राप्त्यै· प्राकाम्यै· ईशितायै· वशितायै· दयाब्धे·
ब्राह्म्यै· माहेश्वर्यै· कौमार्यै· वैष्णव्यै· वाराह्यै· नार
सिंह्यै· चामुंडायै· चंडिकायै· दयाब्धे· १· अनंताय·
वासुदेवाय· तक्षकाय· कल्हीराय· कर्कोटकाय· शं
खपालाय· कंबलाय· अश्वतराय· दयाब्धे· ११ वै शिव
न्याय· पृथवे· हिमवते· हैहयाय· अर्जुनाय· भरता· १५
नलाय· रामाय· नैषधाय· विंध्याय· माल्यवे· पा

रियात्राय॰ मलयाय॰ हेमकूटाय॰ गंधमादनाय॰
दयाभ्ये॰ १२ शक्त्यै॰ स्वाहायै॰ वाराह्यै॰ खड्गिन्यै॰ वारु
ण्यै॰ वायव्यै॰ कौबेर्यै॰ ईशान्यै॰ दयाभ्ये १३ वज्राय॰
शक्त्यै॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰
त्रिशूलाय॰ श्रीमदनंताय॰ दयाभ्ये॰ १४ अथ ग्रंथि
पूजा अनंताय॰ प्रथमग्रंथिपूजयामि कालरूपा॰
दि॰ विष्णवे॰ ३ विष्णवे॰ ४ हरये॰ ५ शिवाय॰ ६ ब्रह्मणे॰ ७
भास्कराय॰ शेषाय॰ ९ सर्वव्यापिने॰ १॰ ईश्वराय॰ ११
विश्वरूपाय॰ १२ महात्मने॰ १३ सृष्टिस्थितिलयाय॰ १४

अ·पू· अथांगपूजा अनंताय·पादौपूजयामि संकर्षणाय·
१८ गुल्फौ·कालात्मने·जानुनी·विश्वरूपाय·जंघे·वि
16 श्वाय·। कटिं·पद्मनाभाय·नाभिं·परमात्मनेन·हृद
यं·वैकुंठाय·कंठं·सर्वास्त्रधारिणे·बाहू·वाचस्प
तये·मुखं·सहस्राक्षाय·नेत्रे पू·केशवाय·ललाट
टं·सर्वात्मने·शिरः·अनंताय·सर्वांगं पूजयामि॥
अथपत्रिपूजा अनंताय·तुलसीपत्रं·संकर्षणाय·शिव
भृंगराजपत्रं·२ परमात्मने·जातीपत्रं ३ विश्वरूपि १८
णे·अपामार्गपत्रं·४ विश्वनाथाय·बिल्वपत्रं·५

पद्मनाभाय·करवीरपत्रं·६ महात्मने·शमीपत्रं·७
श्रीकंठा·अर्जुनपत्रं·८ सर्वास्त्रधारिणे·धत्तूरपत्रं·९
वाक्पतये·विष्णुक्रांतं·१० केशवाय·दाडिमीपत्रं·११
सर्वात्मने·मातुलिंगं·१२ महीधराय·देवदारु·१३ अच्यु
ताय·मरुवकं·१४ अथपुष्पपूजा अनंता·पद्मपुष्पं·
विष्णवे·जातीपुष्पं·केशवाय·चंपकं·अच्युता·कह्लारं·
सहस्रजिते·केतकी·अनंतरूपिणे·वाकुलं·दूर्वा·
श्रीवंतकी·विशिष्टा·पुन्नागं·शिपिविष्टाय·करवीरं·शि
खंडिने·धत्तूरं·नहुषाय·नंद्यावर्त्तं·विश्वबाहवे·म

अ॰पू॰ ञ्जिका॰महीधराय॰मालती॰अच्युता॰गिरिकर्णिकापु
१७ ष्पं॰अथचतुर्दशनामपूजा॥अनघायनमः॰वामनाय॰
शौरिणे॰वैकुंठाय॰पुरुषोत्तमाय॰पद्मनाभाय॰हृषी
केशाय॰माधवाय॰मधुसूदनाय॰अच्युता॰अनंता॰
गोविंदाय॰कृष्णाय॰अपराजिताय॰१४अथपत्नी
पूजनं॰माहिन्यै॰श्रियै॰देव्यै॰पद्मिन्यै॰महाबलायै॰शिव
अज्ञायै॰मंगलायै॰वरदायै॰सुभगायै॰अपराजितायै॰
भगवत्यै॰जयायै॰विजयायै॰सुभद्रायै॰१४केशवा १७
दिनामभिःपूजयेत्॥मत्स्यादिनामभिःपूजयेत्

अष्टोत्तरशतं ॥ वासुदेवाय· हृषीकेशाय· वामनाय· ज
लशायिने· जनार्दनाय· हरयेनमः कृष्णा· पुंडरीकाक्षा·
नृसिंहाय· नरकांतकाय अव्यक्ता· शाश्वते· विष्णवे·
अनंता· अजाय· अव्ययाय· नारायणा· गदाधराय·
गोविंदाय· कीर्तिभाजाय· गोवर्धनधराय· देवाय·
भूधराय· भुवनेश्वराय· सुरेश्वराय· यज्ञपुरुषाय·
यज्ञेशाय· चक्रपाणये· गदापाणये· शंखपाणये·
नरोत्तमाय· वैकुंठाय· दुष्टदमनाय· भूगर्भा· पीत
वाससायिने· त्रिविक्रमाय· त्रिकालज्ञाय· त्रिमूर्तये·

प॰पू॰ नंदिकेश्वराय॰रामरामाय॰हयग्रीवाय॰भीमाय॰
१८ रुद्राय॰भवोद्भवाय॰श्रीपतये॰श्रीधराय॰श्रीशाय॰
18 मंगलाय॰मंगलायुधाय॰दामोदराय॰दमोपेताय॰
केशवाय॰केशीसूदनाय॰वरेण्याय॰वह्नुनाय॰वि
ष्णवे॰अनंताय॰वसुधराय॰वसवे नमः॥ हिरण्य
रेतसे सदीपाय॰पुराणाय॰पुरुषोत्तमाय॰सक
लाय॰निष्कलाय॰शुद्धाय॰निर्गुणाय॰गुणसंस्थि शिव
ताय॰हिरण्यरेतसकाशाय॰सूर्यायुतसमप्रभा १८
य॰मेघश्यामाय॰चतुर्बाहवे॰कुशलाय॰कमलाय॰

भूषणाय·ज्योतिरूपाय·अरूपाय·स्वरूपाय·हृदि
संस्थिताय·सर्वज्ञाय·सर्वरूपस्थिताय·सर्वेशाय·
सर्वतोमुखाय·माधवाय·गोविंदादिपद्मनाभपर्यं
तं·मत्स्यादिदशावतार·ज्ञानकूटस्थाय·अचला
य·आनंदाय·परमाय·प्रभाय·योगेशाय॰भोग
निष्ठाय·योगिने·योगिरूपिणे·सर्वभूतानां·ईश्व
राय·सर्वभूताय·समाय·प्रभवे·९८ ॐ सूशेषा
य·अनंताय·कपिलाय·संकर्षणाय॰तारका
य·फणिभूषणाय·सहस्रशिरसे·सहस्रमूर्त्तये·

अ·पू· नागाधिपतये· हलायुधाय· बलभद्राय· भूधराय· त
१२ क्षकाय· वासुकये· सृष्टिसंहारकाय· भुजंगाय·
19 दिवाकराय· दीर्घपृष्ठाय· सहस्राक्षाय· जगत्पतये·
दामोदराय· तेजोराशये· पद्मनाभाय· पुराणपु
रुषोत्तमाय· सर्वदेवमयाय· सर्वात्मने· अच्युता
य· वैवस्वताय· विश्वरूपाय· त्रैलोक्यपालकाय·
सर्वकामफलप्रदाय· हृषीकेशाय· अनघाय· मु शिव
कुंदकाय· विषधराय· गोकर्णाय· माधवाय· १२
फणींद्राय· सर्वास्त्रधारिणे· सर्वाभरणभूषिताय·

केशवाय॰चतुर्भुजाय॰नागाय॰कलिंगाय॰जनार्द्दनाय॰
श्रीकृष्णाय॰विश्वरूपाय॰विश्वंभराय॰विश्वव्यापिने॰
त्रिविक्रमाय॰परमात्मने॰वासुदेवाय॰सर्वास्त्रधारि
णे॰वाचस्पतये॰उपेंद्राय॰श्रीरामाय॰नानारूपाय॰
लोकस्थितये॰विश्वेश्वराय॰विष्णवे॰भूतात्मने॰
योगीश्वराय॰पुरुषोत्तमाय॰नारसिंहाय॰परमेस
राय॰परायणाय॰विश्वकर्त्रे॰शाश्वताय॰वामदेवा
य॰श्रीनारायणाय॰गदाधराय॰मुकुंदाय॰ब्रह्मांडा
य॰वेदांताय॰सामगाय॰गोविंदाय॰भक्तवत्सलाय॰

अ॰पू॰ सर्वशान्काय॰विश्वात्मनेनमः॥ स्टष्टिसंहारकाय॰अ
२॰ निरुद्धाय॰अनंतरूपाय॰विश्वमूर्त्तये॰गरुडध्व
20 जाय॰त्रैलोक्यनाथाय॰सर्वज्ञाय॰श्रीधराय॰श्री
निवासाय॰सुलोचनाय॰अविमुक्तकेशाय॰दे
वकीनंदनाय॰गोवर्द्धनाय॰लक्ष्मीवल्लभाय॰त्रि
विक्रमाय॰वैकुंठाय॰हिरण्यगर्भाय॰भक्तिप्रि
याय॰समुद्रवासाय॰अनादिनिधनाय॰सि शिव
द्धसंकल्पाय॰१००सुरेशाय॰श्रीनृसाय॰ना २॰

नरकासुरमर्दिने न· श्रीमदनंताय· यत्पुरुषं व्यद
धुः॰ दशांगगुग्गुलं धूपं चंदनं गुरुमिश्रितं॥
धूपानामुत्तमं धूपं अनंताय निवेदये तु॥ धूपं· ब्रा
ह्मणोस्य· त्वं ज्योतिः सर्वदेवानां तेजसां तेजमुत्त
मं॥ आत्मज्योतिः स्वरूप त्वं दीपोयं प्रतिगृह्यतां॥
दीपं· चंद्रमामनसोजातः· क्षीरमाज्यं च पक्वान्नं ना
नाभक्ष्यसमन्वितं॥ अनेकशाकसंयुक्तं नैवेद्यं प्र
तिगृह्यतां॥ नैवेद्यं॥ मध्येपानीयं· कर्पूरवासि
तं तोयं मंदाकिन्याः समाहृतं॥ आचम्यतां जगन्ना

अ.पू. धमयाद तेहि भक्तितः॥ उत्तरापोशानं॥ पानीयंपाव
२१ नंश्रेष्ठंगंगादिसरिदुद्भवं॥ हस्तप्रक्षालनंदेवग्रहा
णमुखशोधनं॥ हस्तप्रक्षालनं॥ मुखप्रक्षालनं॥
चंदनागरुकर्पूरकस्तूर्यादिसमन्वितं॥ करोद्वर्त्त
नकंचारुअनंतप्रतिगृह्यतां॥ करोद्वर्त्तनं॥ कर्पू
रेलालवंगादितांबूलीदलसंयुतं॥ क्रमुकस्यफ
लंतुभ्यंतांबूलंप्रतिगृह्यतां॥ तांबूलं॥ नारीकेर
चकदलंमातुलिंगंफलान्वितं॥ नानाफलाढ्य शिव
संभारंगृहाणपरमेश्वर॥ इदंफलमितिफलं॥ २२

सर्वसिद्धिप्रदं नित्यं हिरण्यं स्थापितं मया ॥
हेमपुष्पसमायुक्तं गृहाणपरमेश्वर ॥ इदं फल
मितिफलं ॥ हिरण्यगर्भेतिदक्षिणा ॥ कर्पूरवर्त्ति
संयुक्तं दीपमालामनोहरं ॥ आर्तिक्यं च गृहाले
दं तेजोराशेजगत्पते ॥ चक्षुर्दमितिनीराजं ॥ ना
भ्याआसीति • कल्हारमल्लिकाजातीकेतकयाव
कुलान्विताः ॥ मयानिवेदितातुभ्यं अनंतायनमो
नमः ॥ मालतीमल्लिकापुष्पैर्नागचंपकसंयुतैः ॥
पुष्पांजलिंगृहाणेदं पादांबुजयुगार्पितं ॥ विष्णुम

अं॰पू॰ त्रैर्मंत्रपुष्पं ॥ समस्तास्यास न्वरि॰ ॥ प्रदक्षिणांकरिष्या
२२ मि भक्तानामीप्सित प्रदः ॥ सच्चिदानंद रूपाय नमो
स्तु जगदात्मने ॥ यानि कानि च प्रदक्षिणा॰ यज्ञेनयज्ञ॰
नमस्ते देव देवेश नमस्ते धरणीधरः ॥ नमस्ते सर्व
नागेंद्र नमस्ते पुरुषोत्तमः ॥ श्रीधराय नमस्तेस्मैगो
वर्द्धने धराय च ॥ नमो विराट् स्वरूपाय अनंता
य नमो नमः २ अनंतरूप विश्वेश अनंत फलदा
यक॰ लोकनाथ नमस्तुभ्यमनंताय॰ ३ सुरासु शिव
राणामीशाय क्षीराब्धिशायनाय च ॥ अनंतानं २२

तद्देवेशाअनंताय·४ नीलांबर नमस्तेस्तु पीतांबरध
रायच॥ जगत्संस्थापनायैव अनंताय·५ नारायण
नमस्तेस्तु नरकार्णवतारक॥ त्रैलोक्यपावकानं
तअनंताय·६ दामोदर नमस्तेस्तु त्राहि मां भवसा
गरात्॥ विश्वेश्वराय सर्वाय अनंताय नमोनमः ७
अनंतगुणरत्नाय विश्वरूपधरायच॥ पुराणपु
रुषेशाय अनंताय नमोनमः ८ योसावनंतरूपेण
ब्रह्मांडं सचराचरं॥ पुष्पवद्धरते नित्यं अनंताय·९
अनंतं कामदं देवं कृष्णं विष्णुं हरिं शिवं॥ सायुधंच

अ॰पू॰ श्रियायुक्तं मनंतं प्रणतोम्यहं ॥१०॥ नानारत्नोज्वलाका
२३ रं सहस्रफणासेवितं ॥श्वेतवस्त्रयुगच्छन्नमनंताय॰११॥
२३ स्थितत्वयि जगत्सर्वं ससुरासुरनायक ॥ आत्मनः का
र्यसिध्यर्थं मनंताय॰१२॥ वाराहेशनृसिंहेशवामने
शत्रिविक्रम ॥ हयग्रीवेशसर्वेशअनंताय॰१३॥ नमो
स्तु नंतायेति॰३४॥ इतिनमस्कारः॥ अथप्रार्थना ॥ आ
वाहनं न जानामि॰ मंत्रहीनं क्रियाहीनं ॥ अनंतकाम
देवेशसर्वकामफलप्रदं ॥ अनंतदोररूपेणपुत्र शिव
पौत्रप्रवर्द्धय ॥ इतिप्रार्थना ॥ अथनमस्कारःपूर्वक २३

दोरकग्रहणं ॥ अनंतसंसारमहासमुद्रमग्नं समभ्यु
द्धर वासुदेव ॥ अनंतरूपी विनियोजयस्व ह्यनंतरू
पाय नमो नमस्ते ॥ इति नमस्कारः ॥ संसारगह्वर
गुहासु सुखं विहर्तुं वांछंति ये कुरुकुलोद्भव शुद्धस
त्वाः ॥ संपूज्य च त्रिभुवनेशमनंतदेवं बध्नंति दक्षि
णकरे च दोरकं ते ॥ अनंतगुणरत्नाय विश्वरूपध
राय च ॥ सूत्रग्रंथीषु संस्थाय अनंताय नमो नमः ॥
इति मंत्रेण पुमान्दक्षिणप्रकोष्ठे स्त्री याम्यवामप्रको
ष्ठे बध्नीयात् ॥ अथ जीर्णदोरकविसर्ज्यं पंचोप

अ·पू·
२४
२५

चारैः संपूजयेत्॥ तत्र नामानि॥ ब्रह्मणे· विष्णवे·
रुद्राय· शेषाय· सर्वभूताय· विश्वरूपाय· अनंताय·
कृष्णाय· वामनाय· त्रिविक्रमाय· केशवाय· शिवाय·
वैकुंठाय· नारायणाय· नमः सर्वहितानंत जगदानं
दचक्षुषे॥ सर्वहारार्णवसंस्थान गृहाणार्घ्यं नमोस्तु
ते॥ दूर्वार्घ्यं॥ अनंतः सर्वनागानामधिपः सर्वकाम
दः॥ व्रतेनानेन सुप्रीतो भवत्विह सदा मम॥ इति शिवू
जीर्णदोरकनमस्कारः॥ अथ ब्राह्मणपूजनं॥ उप २४
वेश्य द्विजः सम्यक् प्रयच्छेदासनं ततः गंधपुष्पादिभि

ईश्वरेश्चेयोहि विभक्तितः॥अथानंतदानं॥अनं
तानंतदेवेशअनंतफलदायकं॥अनंतानंतरूपो
सिअनंतायनमोनमः॥प्रतिगृह्णाहिजःश्रेष्ठअ
नंतफलदायक॥त्वत्प्रसादहंविप्रमुच्येयंकर्मबं
धनात्॥अनंतप्रतिगृह्णातिअनंतोवैददातिच
॥अनंततारकोभाभ्यामनंतायनमोनमः॥दाता
चविष्णुर्भगवाननंतोप्रतिगृहीतासचएवविष्णुः॥
॥मयापरित्यक्तमिदंहिसर्वंगृहाणविश्वेशसमर्प
यामि॥इतिवायनं॥न्यूनातिरिक्तानिपरिस्फुटानि

अ॰पू॰ यानीह कर्माणि मया कृतानि ॥ क्षम्याणि चैतानि मम क्ष
२५ मस्व प्रयाहि तुष्टः पुनरागमाय ॥ मंत्रहीनं ॰यस्य स्म
२५ त्या॰ ॥ इति श्रीमदनंतपूजा समाप्तः ॥ अथ वायनं ॥
शीलिसदनाग्रस्थस्य पुंनाम्ना संस्कृतस्य च ॥ अ
र्धं विप्राय दातव्यं अर्धमात्मनि भोजनं ॥ शक्त्या
चदक्षिणां दद्याद्वित्त शाठ्य विवर्जितः ॥ अथ दान शिव
मंत्रः ॥ पक्वान्नं फल संयुक्तं सघृतं दक्षिणान्वितं ॥ २५
द्विजवर्याय दास्यामि व्रत संपूर्ण हेतवे ॥ इति मंत्रः ॥

26

इतिपूजासमाप्तं म्॥ श्रीरामायनमः॥ श्रीकृष्णा
र्पणमस्तु॥ शुभंभवतु॥ यादृशंपुस्तकंदृष्ट्वाता
दृशंलिखितंमया॥ यदिशुद्धमशुद्धंवाममदोषो
नविद्यते॥

अ॰पू॰

२८

अनंतपूजासमाप्तः

शि२
२८